No. ५८ ख

Title शिवताण्डव स्तोत्रम् (सटीकम्)

Author रावणः (गणेशशास्त्री)

Extent ५ पत्र Age

Subject स्तोत्र

शिवताण्डवस्तोत्रं रावणकृतम् प॰ ५ श्लो॰ १३५
नं ५८

॥ ॐ श्रीगणेशाय नमः ॥ किशोरचंद्रशेखरे मम रतिः प्रतिक्षणं अस्तु ॥ कथंभूते किशोरचंद्रशेखरे धगद्धगद्धगज्ज्वलल्ललाट पट्टपावके पुनः कथंभूते जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरी विलोलवीचिवल्लरी विराजमानमूर्द्धनि इत्यन्वयः ॥ किशोरश्चासौ चंद्रः किशोरचंद्रः स एव शेखरः शिरोभूषणं यस्य सः तस्मिन् किशोरचंद्रशेखरे महेश्वरे मम रतिः प्रीतिः प्रतिक्षणं नाम क्षणं प्रति अस्तु । कथंभूते किशोरचंद्रशेखरे धगद्धग इति शब्देन ज्वलन् ललाटपट्टे पावको यस्य सः तस्मिन्

॥ श्रीगणपतये नमः ॥ जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरीविलोलवीचिवल्लरीविराजमानमूर्द्धनि ॥
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके किशोरचंद्रशेखरे रतिः प्रतिक्षणं मम ॥१॥

पुनः कथंभूते जटा एव कटाहः जटाकटाहः तस्मिन् जटाकटाहे संभ्रमेण वेगेन भ्रमंति चासौ निलिंपनिर्झरी निलिंपंते इति निलिंपा देवाः लिपि[illegible] चिगीकरणे धातुः । प्रतिमासं लिंपंते इत्यर्थः तेषां निर्झरी नदी श्रीगंगा तस्याः विलोला वीचयः चंचला ऊर्मयः ॥ विलोलवीचय एव वल्लर्यः लतास्ताभिः विराजमानो मूर्द्धा शिरो यस्य सः तस्मिन् किशोरचंद्रशेखरे मम रतिः प्रीतिः प्रतिक्षणम् अस्तु ॥२॥ श्रीरामाय कृष्णाय गोविन्दाय परमेश्वराय वासुदेवाय नारायणाय च नमः ॥

१

धराधरेंद्रेति ॥ कचि दिगंबरे वस्तुनि मेमनः विनोदं स्तातु ॥ कथंभूते दिगंबरे कृपाकटाक्षघोरणी निरुद्ध दुर्द्धरापदि ॥ पुनः कथंभूते दि
गंबरे धराधरेंद्र नंदिनी विलास वंधुवंधुर स्फुरद्दृगंतसन्ततिप्रमोदमानमानसे इत्यन्वयः कचि दिगंबरे दिक् अंबरं यस्य सः दिगंबरः
तस्मिन् दिगंबरे वस्तुनि वेदग्रंथ्यैः प्रतिपाद्य वस्तुनि ब्रह्मणीत्यर्थः ॥ कथंभूते दिगंबरे वस्तुनि कृपाकटाक्षघोरणी निरुद्ध दुर्द्धरापदि
कृपया कटाक्षः कृपाकटाक्षः कृपाकटाक्षाणां घोरणी परंपरा पंक्तिः तया कृपाकटाक्षघोरण्या निरुद्धा दुर्द्धरा आपदो येन सः
निरुद्ध दुर्द्धरापत् तस्मिन्स्वभक्तेषु कृपाकटाक्षेण दूरीकृताः दुर्द्धरा आपदो येन दुःखेन धर्तुं शक्या इति दुर्धराः धराधरा

धराधरेंद्र नंदिनी विलासवंधुवंधुर स्फुरद्दृगंतसंततिप्रमोदमानमानसे कृपाकटाक्षघोरणीनिरुद्ध दुर्द्ध
॥ रापदि कचि दिगंबरे मनो विनोदमेतु वस्तुनि ॥ २ ॥

णामिंद्रः धराधरेंद्रः धराधरेंद्रस्य नंदिनी सुता पार्वती तस्याः दृगंतो दृशोरंतः विलासानां वंधवः विलासवंधवः विलास
वंधवश्च वंधुराश्च विलासवंधुवंधुराः विलासाश्च वंधुराश्च स्फुरंतश्च ते दृगंताश्च विलासवंधुवंधुर स्फुरद्दृगंताः तेषां
सन्ततिः पंक्तिः तया प्रमोदमानं मानसं यस्य सः तस्मिन् वंधुराः अतिसुंदरा मनोहरा इत्यर्थः । एवंभूता स्फुरद्दृगंताश्चंच
लाः कटाक्षाः तेषां संततिः पंक्तिस्तया विनोदमानं मनो यस्य सः एवंभूते दिगंबरे मेमनः विनोदमस्तु नुदप्रेरणे धातुः वि

गातंतिनोदं विनोदं निकुञ्ज मसृणं र्विलसित काश
वाद्येतितिनोदं विलासमसृणं विलासिं ॥

व=१

शिवः १

जटाभुजंगेति॥ मे मनः भूतभर्त्तरि अद्भुतं विनोदं विभर्तु कथंभूते भूतभर्त्तरि मदांधसिंधुरासुरत्वगुत्तरीयमेदुरे पुनः कथंभूते
भूतभर्त्तरि जटाभुजंगपिंगलस्फुरत्फणामणीप्रभा कदंबकुंकुमद्रवप्रलिप्तदिग्वधूमुखे इत्यन्वयः। भूतानां भर्ता भूतभर्ता भूतानां प्रा
णिनां स्थावराणां जंगमानां भर्ता पालकः॥ तथा चोक्तं गीतासु॥ तयाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च अमृतं चैव मृत्युश्च
सदसच्चाहमर्जुन॥ इत्यर्थः॥ तस्मिन् भूतभर्त्तरि मम मनः अद्भुतं विनोदं क्रीडां विभर्तु कथंभूते भूतभर्त्तरि मदेन अंधः मदांधः म
दांधश्चासौ सिंधुरासुरश्च मदांधसिंधुरासुर तस्य त्वगेव उत्तरीयं वसनं तेन मेदुरः स्निग्धः तस्मिन् मदांधसिंधुरासुरत्वगुत्तरीयमेदुरे॥

जटाभुजंगपिंगलस्फुरत्फणामणिप्रभा कदंबकुंकुमद्रवप्रलिप्तदिग्वधूमुखे मदांधसिंधरासुरत्वगुत्तरीयमे
दुरे मनो विनोदमद्भुतं विभर्तु भूतभर्त्तरि॥३॥

पुनः कथंभूते भूतभर्त्तरि जटासु भुजंगाः जटाभुजंगाः जटाभुजंगस्य पिंगलाश्च ते स्फुरंतः फणामणयः जटाभुजंगपिंग
लस्फुरत्फणामणयः जटाभुजंगपिंगलस्फुरत्फणामणीनां प्रभाः ताभिः जटाभुजंगपिंगलस्फुरत्फणामणिप्रभानां कदंब
मेव कुंकुमद्रव तेन जटाभुजंगपिंगलस्फुरत्फणामणिप्रभाकदंबकुंकुमं द्रवेण प्रलिप्तानि दिग्वधूमुखानि येन सः॥
तस्मिन् जटाभुजंगपिंगलस्फुरत्फणामणिप्रभाकदंबकुंकुमद्रवप्रलिप्तदिग्वधूमुखे॥३॥ श्रीरामायनमः।

ललाटेति॥ कपालिमहो नः संपदेस्त्वस्तु॥ कथंभूतं कपालिमहः सुधामयूखरेखया विराजमानशेखरं॥ पुनः कथंभूतं कपालिमहः॥ ल
२ लाटचत्वराज्वलद्धनंजयस्फुलिंगपानिपीतपंचसायकं॥ पुनः कथंभूतं नमन्निलिंपनायकमित्यन्वयः॥ ललाटमेव चत्वरं ललाट च
त्वरं तस्मिन् ललाटचत्वरे ज्वलन् चासौ धनंजयः ललाटचत्वरज्वलन् धनंजयः ललाटचत्वरज्वलधनंजयस्य स्फुलिंगा लला
2 टचत्वरज्वलद्धनंजयस्फुलिंगा तया ललाटचत्वरज्वलद्धनंजयस्फुलिंगपानि पीतः नामातिशयेन दग्धः पंचसायकः
कामदेवः येनैन तत् ललाटचत्वरज्वलधनंजयस्फुलिंगपानि पीतपंचसायकं नमंतो निलिंपनायका यस्मिन् तत् नम

[redacted]

ललाटचत्वरज्वलद्धनंजयस्फुलिंगपानिपीतपंचसायकं नमन्निलिंपनायकं सुधामयूखरेखया विराजमानशे
खरं महः कपालि संपदे सरिज्जटालमस्तु नः॥४॥

न्निलिंपनायकं सुधामयानि मयूखानि यस्य सः॥ सुधामयूखः सुधामयूखस्य रेखा सुधामयूखरेखा तया सुधामयूखरेखया विराज
मानशेखरं शिरोभूषणं यस्य तत् सुधामयूखरेखा तया विराजमाने शेखरं॥ पुनः कथंभूतं॥ अशाला जटा यस्य तत्॥ जटालं शरिता जया
लं सरिज्जटालं कपालमस्यास्तीति कपालिमहः तेजः एवं भूतं कपालिमहो नः अस्माकं संपदे नाम मोक्षाय अस्तु॥ छ॥४॥छ॥

लं=१

शिवः
२

सहस्रलोचनेति ॥ चकोरबंधुशेखरो नोऽस्माकं श्रियै चिराय जायतां कथंभूतः चकोरबंधुशेखरः भुजंगराजमालया निबद्धजाटजूटकः
पुनः कथंभूतः चकोरबंधुशेखरः सहस्रलोचनप्रभृत्यशेषलेखशेखरे प्रसूनधूलिधोरणी विधूसरांघ्रिपीठभूः इत्यन्वयः ॥ चकोरा-
णां बंधुश्चकोरबंधुः शेखरो यस्य सः चकोरबंधुशेखरः अस्माकं श्रियै ब्रह्मविद्यारूपलक्ष्म्यै चिराय जायतां कथंभूतः भुजंग
राजमालया निबद्धजाटजूटकः भुजंगानां राजानः भुजंगराजा ॥ भुजंगराजानां माला तया भुजंगराजमालया निबद्धो जाटजूटो
येन सः भुजंगराजमालया जाटश्चासौ जूटकश्च जाटजूटकः जूट एव जूटकः स्वार्थे कन् पुनः कथंभूतः सहस्रलोचनेति ॥

सहस्रलोचनप्रभृत्यशेषलेखशेखरप्रसूनधूलिधोरणी विधूसरांघ्रिपीठभूः भुजंगराजमालयानिब
द्धजाटजूटकः श्रियै चिराय जायतां चकोरबंधुशेखरः ॥५॥

सहस्रं लोचनानि यस्य सः सहस्रलोचनः इंद्रः सहस्रलोचनप्रभृतयश्च ते अशेषलेखाः सहस्रलोचनप्रभृत्यशेषलेखाः ॥
इंद्रप्रभृतशेखराणि यश्च तेऽशेषलेखा देवास्तेषां ये शेखराः कुस्मादयस्तेषां यानि प्रसूनानि सहस्रलोचनप्रभृत्यशेष
लेखरप्रसूनानि तेषां सहस्रलोचनप्रभृत्यशेषलेखशेखरप्रसूना धूलयस्तासां सहस्रलोचनप्रभृत्यशेषलेखशेख
रप्रसूनधूलीनां या धोरणी तया विधूसरा अंघ्री पीठभूर्यस्य सः प्रसूनधूलिधोरणीविधूसरांघ्रिपीठभूः ॥५॥ ना=

करालभालेति ॥ मम त्रिलोचने रतिरस्तु कथंभूते त्रिलोचने धराधरेंद्रनंदिन्याः कुचाग्रचित्रकपत्राणां प्रकल्पने रचनेन एकशि
ल्पिनि तस्मिन् पुनः कथंभूते करालभालपट्टिकायां धगद्धगदिति शब्देन ज्वलन् न चासौ धनंजयः तस्मिन्नाहुतीकृतः प्रचंडः पंच
सायको येन पंचसायकानि वाणा निं यस्य सः पंचसायकः प्रचंडश्चासौ पंचसायकः प्रचंडपंचसायकः कंदर्पः जगद्धुरंधरः अ
३ स्माकं श्रियं तनोतु जगतः त्रिलोक्याः धूः भारः तं धरति जगद्धुरंधरः कथंभूतो जगद्धुरंधरः निलिंपनिर्झरीधरः निलिंपा देवा
3 स्तेषां निर्झरी नदी श्रीगंगा तां धरतीति निलिंपनिर्झरीधरः पुनः कथंभूतः कृतिसुंदरः कृतिशब्देन गजचर्म उच्यते कृत्या सुंदरः

करालभालपट्टिकाधगद्धगद्धगज्ज्वलद्धनंजयाहुतीकृतप्रचंडपंचसायके ॥ धराधरेंद्रनंदिनीकुचाग्रचित्रपत्रकप्रकल्प
नैकशिल्पिनि त्रिलोचने रतिर्मम ॥६॥ नवीनमेघमंडलीनिरुद्धदुर्धरस्फुरत्कुहूनिशीथिनीतमःप्रबंधबद्धकंधरः नि
लिंपनिर्झरीधरस्तनोतु कृत्तिसुंदरः कलानिधानबंधुरः श्रियं जगद्धुरंधरः ॥७॥

शोभां प्राप्त इत्यर्थः पुनः कलानिधानबंधुरः कला निधीयंते स्थाप्यंतेऽस्मिन्निति कलानिधानश्चंद्रः तेन बंधुरः सुंदरः इत्यर्थः।
पुनः कथंभूतः नवीना चासौ नवीनमेघमंडली नवीनमेघमंडल्या निरुद्धं नाम निबद्धं दुर्धरं स्फुरत् च कुहूनिशीथिनीतमः दुःखे
न धर्तुं शक्यमिति दुर्धरं स्फुरत् भासमानं एवंभूतं यत् कुहूनिशीथिनीसंबंधितमः ॥ अंधकारः तस्य प्रबंधो येनैरंतर्यं तेन बद्धा कंध
रा येन सः एवंभूतो जगद्धुरंधरो ऽस्माकं श्रियं तनोतु ॥ टी ॥ ७ ॥ टी ॥

ल=४

प्रफुल्लेति ॥ तमंतकच्छिदं अहं भजे ॥ कथंभूतं तमंतकच्छिदं स्मरं छिनत्तीति स्मरच्छित् तं पुनः कथंभूतं पुरं छिनत्तीति पुरच्छित् तं पुनः कथंभूतं ॥
भवं संसारं छिनत्तीति भवच्छित् तं भवच्छिदं मखं छिनत्तीति मखच्छित् तं मखच्छिदं दक्षयज्ञविनाशिनं पुनः कथंभूतं गजासुरं छिनत्तीति
गजच्छित् तं गजच्छिदं अंधकं छिनत्तीति अंधकच्छित् तमंधकच्छिदं अंतकोयमं छिनत्तीति अंतकच्छित् तमंतकच्छिदं पुनः कथं
त्ती=४ भूतं प्रकर्षेण फुल्लतीति प्रफुल्लं प्रफुल्लं च तत् नीलपंकजं प्रफुल्लनीलपंकजं प्रफुल्लनीलपंकजस्य प्रपंचो विस्तारः ॥ तस्येयं कालिमा का
लुष्यं तस्य प्रभा अवलंबितुं शीलं यस्य सा प्रभावलंबिनी प्रभावलंबिनी चासौ कंठकंदली तस्याः कंठकंदल्याः रुचिलस्याः कंठकं
दली रुच्या प्रकर्षेण बद्धा कंधरा येन सः प्रफुल्लनीलपंकजप्रपंचकालिमप्रभावलंबिकंठकंदलीरुचिप्रबद्धकंधरः ॥ टि ॥ ८ ॥ टि ॥

प्रफुल्लनीलपंकजप्रपंचकालिमप्रभावलंबिकंठकंदलीरुचिप्रबद्धकंधरं स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छि
दं गजच्छिदांधकच्छिदं तमंतकच्छिदं भजे ॥ ८ ॥ अखर्वसर्वमंगलाकलाकदंबमंजरीरसप्रवाहमाधुरीविजृंभणाम
धुव्रतं स्मरांतकं पुरांतकं भवांतकं मखांतकं गजांतकांधकांतकं तमंतकांतकं भजे ॥ ९ ॥

अखर्वेति ॥ तं अंतकांतकमहं भजे अंतोवसानं तं करोतीत्यंतको यमः अंतकस्याप्यंतकः अंतकांतकः तं पुनः कथंभूतं स्मरांतकं स्मरः
कामस्तस्यांतं करोतीति स्मरांतकः तं पुनः कथं पुरांतकं पुरासंज्ञकाः दैत्यास्तेषामंतं करोतीति तं पुनः कथंभूतं भवांतकं भवः संसारस्त
स्याप्यंतकं करोतीति आत्मस्वरूपप्रकाशकत्वेनेत्यर्थः ॥ तथा चोक्तं गीतासु ॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं
तं येन मामुपयांति ते ॥ पुनः कथंभूतं गजांतकं गजासुरहर इत्यमरः पुनः कथंभूतं अंधकांतकं अंधकासुरहंतुः इति यावत् ॥
पुनः कथंभूतं अखर्वेति ॥ अखर्वायाः सर्वमंगलायाः कलाविद्याः कदंबमंजर्याः समुदायरूपायाः मंजर्याः तासां मंजरीणां रसस्तु
पीयूषः प्रवाहस्तस्य प्रवाहस्य माधुरी मधुरता तस्याः मधुरतायाः विजृंभणा विस्तारस्तस्य मधुव्रतः भ्रमरः सर्वविद्यानुपसमु
दायस्य तत्त्वं जानातीत्यर्थः ॥ तथा चोक्तं ॥ सर्वतीर्थमयी गंगा सर्वदेवमयो हरिः सर्वशास्त्रमयी गीता सर्वविद्यामयः शिवः ॥ ९ ॥

जयेति ॥ शिवः जयति सर्वोत्कर्षेण प्रवर्तते । कथंभूतः शिवः धिमिंधिमिं धमित्याकारेण ध्वनन्योमृदंगः तस्य यत्तुंगो मंगलो ध्वनि
लस्य ध्वनेः यः क्रमस्तेन प्रवर्तितं प्रचंडतांडवं येन सः पुनः कथंभूतः शिवः ज्वदभ्राः दीर्घा विभ्रमंतः विलासवंतः भ्रमंतश्चते भु
८ जंगमाः सर्पा तेषां श्वसन् प्राणस्तस्य योनिति र्गमस्तस्य विनिर्गमस्य यः क्रमस्तेन स्फुरन् भासमानः करालो भालवर्ति
हव्यवाट् अग्निर्यस्य सः ॥१०॥ अहं कदा सदा शिवं भजामि कथंभूतोऽहं एतेषु समप्रवृत्तिकः केषु दृषत् पाषाणयोः विचि
९ त्रं तल्पं च एतयोः समप्रवृत्तिकः समः प्रवृत्तिर्वर्तनं यस्य सः भुजंगमौक्तिकस्रजोरेतयोः समप्रवृत्तिकः गरिष्ठरत्न
लोष्ठयोः गरिष्ठमुत्तमं तद्रत्नं च गरिष्ठरत्नं लोष्ठं मृत्तपिंडः एतयोः समप्रवृत्तकः सुहृन्मित्रः विद्वः रिपुः एतयोः सम

जयत्वदभ्रविभ्रमभ्रमद्भुजंगमश्वसद्विनिर्गमक्रमस्फुरत्करालभालहव्यवाट् ॥ धिमिंधिमिंधिमिंध्वनन्मृदं
गतुंगमंगलध्वनिक्रमप्रवर्तितः प्रचंडतांडवः शिवः ॥१०॥ दृषद्विचित्रतल्पयोर्भुजंगमौक्तिकस्रजोर्गरिष्ठर
त्नलोष्ठयोः सुहृद्विपक्षपक्षयोः तृणारविंदचक्षुषोः प्रजामहीमहेन्द्रयोः समप्रवृत्तिकः कदा सदाशिवं भजा
म्यहम् ॥११॥ कदा निलिंपनिर्झरीनिकुंजकोटरे वसन् विमुक्तदुर्मतिः सदा शिरःस्थमंजलिं वहन् विलोललोललो
चनो ललामभाललग्नकः शिवेति मंत्रमुच्चरन् सदा सुखी भवाम्यहम् ॥१२॥

प्रवृत्तिकः तृणं अरविंदं च चक्षुर्यस्य सः एतयोः समप्रवृत्तिकः प्रजा मही महेंद्रयोः प्रजाः सर्वजनाः मही महेंद्रो राजा एतयोः
समप्रवृत्तिकः सन् ऽहं कदा सदा शिवं भजाम्यहं ॥ इत्यन्वयः ॥११॥ कदा निलिंपेति ॥ अहं कदा सदा सुखी भवामि । इत्थं भूतो
ऽहं निलिंपनिर्झरीनिकुंजकोटरे वसन् निलिंपानां निर्झरी नदी तस्याः निलिंपनिर्झर्याः निकुंजः तस्य निकुंजस्य
कोटरः अंतर्देशस्तस्मिन् वसन् पुनः कथंभूतोऽहं विमुक्तदुर्मतिः विमुक्ता दुर्मतिर्येन सः विमुक्तदुर्मतिः पुनः किं कुर्वन् सन् सदा शिरःस्थमंजलिं वहन्
सन् अंजलिं करद्वयसंयोगं पुनः किं कुर्वन् सन् शिवेति मंत्रमुच्चरन् सन् कथंभूतः शिवेति मंत्रं विलोललोललोचनो ललामभाललग्नकं विलो

लिप्रकृतिलिंविलासनामिश्रविलासलोचनाप्रपत्तिकार्य ह्रदयं तदेव
भालेलग्नकं भजेत्तलितविभालतलातङ्कं ॥१२॥

मू=३

शिवः ४

निलिंपेति॥ ततदंगजत्विषांचयः अस्माकं मनोमुदं तनोतु कथंभूतंमुदं अहर्निशंमोदहेतुं कथं पुनस्तदंगजत्विषांचयः परश्रियः प
रंपदं परमलक्ष्म्याः पराश्रियः पुनः कथंभूतं निलिंपेति निलिंपनाथानां नागर्यः तासां कदंबं तस्य कदंबस्य मौलौ ये निगुं
फः ग्रंथनं तस्मान्निगुंफान्निर्भरं अतिशयेन क्षरन् मधुप्र तेन मधुनाया ऽस्मिकाप्रवेद शोभा तस्या मनोहरः एवंभूतो
यस्तदंगजत्विषांचयः समुदायः सो नो ऽस्माकं मनोमुदं हर्षं तनोतु विस्तारयत्वित्यर्थः ॥१३॥ प्रचंडेति॥ विमुक्तवाम
लोचनाविवाहकालिकध्वनिः जगज्जयायतां विमुक्ता चासौ वामलोचना श्रीपार्वती तस्याविवाहकाले भवो ध्वनिः कथंभू

निलिंपनाथनागरीकदंबमौलिमल्लिका निगुंफनिर्भरक्षरन्मधूष्णिकामनोहरः तनोतु नो मनो मुदं विनो
दती महर्निशं परश्रियः परंपदं तदंगजत्विषांचयः ॥१३॥ प्रचंडवाडवानलप्रभाशुभप्रचारिणी महा
जन=३ अष्टसिद्धिकामिनी जनावहूतजल्पना॥ विमुक्तवामलोचनाविवाहकालिकध्वनिः शिवेतिमंत्रभूष
णा जगज्जयाय जायतां ॥१४॥

तो ध्वनिः शिवेतिमंत्रं भूषणा शिवेतिमंत्रो भूषणो यस्याः पुनः कथंभूता॥ प्रचंडेति॥ प्रचंडश्चासौ वाडवानलः प्रचंडवाड
वानलः संतापकत्वेन प्रचंडवाडवानलवत्प्रभा येषां तानि प्रचंडवाडवानलप्रभाणि हत्तादृशानि याान्यशुभानि तानि प्रचं
डितं भक्षयितुं शीलं यस्याः सा तथा पुनः कथंभूता महाष्टसिद्धि रूपायः कामिन्या जनास्तेना बहूना स्वीकृता जल्पना कीर्त
नं यस्याः सा तथा॥१४॥ इति श्रीगणेश भारतीकृता दशवदनकृत शिवतांडव पद्ययोजनिकासमाप्ता॥ शुभमस्तु॥६॥

जटाटवीगलज्जलप्रवाहपाविते स्थले गलेऽव
लंबितां भुजंगतुंगमालिकां डमड्डमड्डमन्निनादव
ड्डमर्वयं चकार चंडतांडवं तनोतु नः शिवः शिवं
सदा॥१॥ शालिन्या मे एरुताइयं एकश्लोकेन स्तुतिः॥

।। द्विनवाद्वो हि रंगीहत्वालेभे राज्यंप्रुधिष्ठिरः ।। एवंभूतत्तद्ये लैव भवत्यार्थ स्सतामपि ।। १ ।।

५

5



शिव॰ ५